
# अष्टादशः पाठः

**लङ्लकार-प्रयोगः** (ଅତୀତ କାଳ ପ୍ରୟୋଗ)


## चतुरः वानरः



एकस्याः नद्याः तीरे एकः जम्बुवृक्षः आसीत्। वृक्षस्य शाखायाम् एकः वानरः अवसत्। स पक्वफलानां भक्षणम् अकरोत्।

एकदा एकः मकरः वृक्षमूलम् आगच्छत्। वानरः मकरस्य कृते पक्वानि फलानि अददात्। सः मकरः कानिचन फलानि अखादत्। कानिचन भार्यायाः कृते गृहम् अनयत्। तस्य भार्या मकरं प्रति अकथयत् - "अहो जम्बुफलानि मधुराणि। यः प्रतिदिनं मधुराणि फलानि खादति, तस्य हृदयम् अवश्यं मधुरम्। भो पतिदेव ! अहं तस्य वानरस्य हृदयम् इच्छामि"।


अपरस्मिन् दिवसे मकरः पुनः वृक्षमूलम् आगच्छत्। सः वानरं प्रति अकथयत् - "मित्र ! मम भार्या तव निमन्त्रणम् अकरोत्। आगच्छ, मम पृष्ठदेशे उपविश। अहं तत्र त्वां नयामि।"



वानरः मकरपृष्ठम् आरोहत्। नदीमध्ये मकरः अवदत् - "मित्र! सत्यं वदामि। मम भार्या तव हृदयम् इच्छति।"

वानरः चकितः अभवत्, इष्टम् अस्मरत्। विचारम् अकरोत्। पुनः अकथयत्- "मम प्रियमित्र ! पूर्वं कथं न अवदत् ? हृदयं वृक्षस्य कोटरे अस्ति। अधुना तत्र मां नय। तत् आनयामि। अत्र पुनः आगच्छावः।"

ततः मकरः वानरं वृक्षमूलम् अनयत्। झटिति वानरः वृक्षस्य उपरि आगच्छत्। मूर्खः मकरः निराशः अभवत्। वानरः कौशलेन स्वप्राणान् अरक्षत्।



शब्दार्था:-

एकस्या: नद्या: - ଗୋଟିଏ ନଈର, जम्बुवृक्ष: - ଜାମୁଗଛ, शाखायाम् - ଡାଳରେ, अवसत् - ବାସ କରୁଥିଲା, पक्वफलानां - ପାଚିଲା ଫଳଗୁଡ଼ିକର, एकदा - ଥରେ, मकर: - କୁମ୍ଭୀର, कृते - ପାଇଁ, कानिचन - କେତେଗୋଟି, अवश्यम् - ନିଶ୍ଚୟ, अपरस्मिन् दिवसे - ଅନ୍ୟ ଏକ ଦିନରେ, पुन: - ପୁଣି, पृष्ठदेशे - ପିଠିରେ, उपविश - ବସ, तत्र - ସେଠାକୁ, आरोहत् - ଚଢ଼ିଲା, पूर्वं - ପୂର୍ବରୁ, कथं - କାହିଁକି, अस्ति - ଅଛି, अधुना - ବର୍ତ୍ତମାନ, तत: - ତା'ପରେ, झटिति - ଶୀଘ୍ର, उपरि - ଉପରକୁ, निराश: - ହତାଶ, अरक्षत् - ରକ୍ଷା କଲା, आसीत् - ଥିଲା ।

## अभ्यास: (ଅଭ୍ୟାସ)



१. उत्तराणि लिखतु - (ଉତ୍ତର ଲେଖ)

क) जम्बुवृक्षे क: अवसत् ?

ख) वानर: जम्बुफलानि कस्य कृते अददात् ?

ग) कानि फलानि मधुराणि ?

घ) वानर: किम् आरोहत् ?

ङ) क: निराश: अभवत् ?

२. शून्यस्थानानि पूरयतु - (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

क) एक: ________ अवसत् । (अहम्, वानर:, त्वम्)

ख) मधुराणि ________ खादति । (फलं, फले, फलानि)

ग) ________ ! सत्यं वदामि । (मित्र:, मित्रे, मित्र)

घ) स: वानरं प्रति ________ । (अकथय:, अकथयत्, अकथयम्)

ङ) वानर: ________ अभवत् । (चकित:, चकितौ, चकिता:)

३. रेखाङ्कितपदानां संशोधनं करोतु। (ରେଖାଙ୍କିତ ପଦଗୁଡ଼ିକର ସଂଶୋଧନ କର)

क) अहं तत्र त्वं नयामि।


ख) अपरस्याः दिवसे मकरः पुनः आगच्छत्।

ग) एकस्मिन् नद्याः तीरे जम्बुवृक्षः आसीत्।


घ) सः पक्वफलानि भक्षणम् अकरोत्।


ङ) मम भार्या तव हृदयम् इछामि।

४. चित्रं पश्यतु नाम लिखतु। (ଚିତ୍ର ଦେଖ, ନାମଲେଖ)









५. मातृभाषया अनुवादं करोतु। (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)

क) तस्य भार्या मकरं प्रति अकथयत्।

ख) आगच्छ! मम पृष्ठदेशे उपविश।

ग) मित्र! सत्यं वदामि।

घ) अत्र पुनः आगच्छावः।

ङ) वानरः कौशलेन सप्राणान् अरक्षत्।

६. वाक्यानि रचयतु। (ବାକ୍ୟରଚନା କର)

एकः, अवसत्, दिवसे, फलानि, चकितः, इच्छति।

***